श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ९

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ९

*जगत्सृष्टिप्रकारवर्णनम्*

स्थितः स कमलोद्भवस्तव हि नाभिपङ्केरुहे
कुतस्विदिदमम्बुधावुदितमित्यनालोकयन्।
तदीक्षणकुतूहलात् प्रतिदिशं विवृत्तानन-
श्चतुर्वदनतामगाद्विकसदष्टदृष्टयम्बुजाम्॥ १ ॥

महार्णवविघूर्णितं कमलमेव तत् केवलं
विलोक्य तदुपाश्रयं तव तनुं तु नालोकयन्।
क एष कमलोदरे महति निस्सहायो ह्यहं
कुतस्स्विदिदमम्बुजं समजनीति चिन्तामगात्॥ २ ॥

अमुष्य हि सरोरुहः किमपि कारणं सम्भवे-
दिति स्म कृतनिश्चयस्स खलु नाळरन्ध्राध्वना।
स्वयोगबलविद्यया समवरूढवान् प्रौढधी-
स्त्वदीयमतिमोहनं न तु कळेबरं दृष्टवान्॥ ३ ॥

ततस्सकलनाळिकाविवरमार्गगो मार्गयन्
प्रयस्य शतवत्सरं किमपि नैव सन्दृष्टवान्।
निवृत्य कमलोदरे सुखनिषण्ण एकाग्रधीः
समाधिबलमादधे भवदनुग्रहैकाग्रही॥ ४ ॥

शतेन परिवत्सरैर्दृढसमाधिबन्धोल्लसत्
प्रबोधविशदीकृतस्स खलु पद्मिनीसम्भवः।
अदृष्टचरमद्भुतं तव हि रूपमन्तर्दृशा
व्यचष्ट परितुष्टधीर्भुजगभोगभागाश्रयम्॥ ५ ॥

किरीटमकुटोल्लसत् कटकहारकेयूरयुङ्-
मणिस्फुरितमेखलं सुपरिवीतपीतांबरम्।
कळायकुसुमप्रभं गळतलोल्लसत्कौस्तुभं
वपुस्तदयि भावये कमलजन्मने दर्शितम्॥ ६ ॥

श्रुतिप्रकरदर्शितप्रचुरवैभव श्रीपते
हरे जय जय प्रभो पदमुपैषि दिष्ट्या दृशोः।
कुरुष्व धियमाशु मे भुवननिर्मितौ कर्मठा-
मिति द्रुहिणवर्णितस्वगुणबंहिमा पाहि माम्॥ ७ ॥

लभस्व भुवनत्रयीरचनदक्षतामक्षतां
गृहाण मदनुग्रहं कुरु ताश्च भूयो विधे।
भवत्वखिलसाधनी मयि च भक्तिरत्युत्कटे-
त्युदीर्य गिरमादधा मुदितचेतसं वेधसम्॥ ८ ॥

शतं कृततपास्ततस्स खलु दिव्यसंवत्सरा-
नवाप्य च तपोबलं मतिबलं च पूर्वाधिकम्।
उदीक्ष्य किल कम्पितं पयसि पङ्कजं वायुना
भवद्बलविजृम्भितः पवनपाथसी पीतवान्॥ ९ ॥

तवैव कृपया पुनस्सरसिजेन तेनैव स
प्रकल्प्य भुवनत्रयीं प्रववृते प्रजानिर्मितौ।
तथाविधकृपाभरो गुरुमरुत्पुराधीश्वर
त्वमाशु परिपाहि मां गुरुदयोक्षितैरीक्षितैः॥ १० ॥

**********